Test Paper : **III**

Test Subject : **SANSKRIT**

Test Subject Code : **K-1916**

Test Booklet Serial No. : ____________________

OMR Sheet No. : ____________________

Roll No.

(Figures as per admission card)

**Name & Signature of Invigilator/s**

Signature : ____________________

Name : ____________________

**Paper : III**

**Subject : SANSKRIT**

Time : 2 Hours 30 Minutes

Maximum Marks : 150

Number of Pages in this Booklet : **12**

Number of Questions in this Booklet : **75**

**ಅಭ್ಯರ್ಥಿಗಳಿಗೆ ಸೂಚನೆಗಳು**

1. ಈ ಪುಟದ ಮೇಲ್ತುದಿಯಲ್ಲಿ ಒದಗಿಸಿದ ಸ್ಥಳದಲ್ಲಿ ನಿಮ್ಮ ರೋಲ್ ನಂಬರನ್ನು ಬರೆಯಿರಿ.
2. ಈ ಪತ್ರಿಕೆಯು ಬಹು ಆಯ್ಕೆ ವಿಧದ ಎಪ್ಪತ್ತೈದು ಪ್ರಶ್ನೆಗಳನ್ನು ಒಳಗೊಂಡಿದೆ.
3. ಪರೀಕ್ಷೆಯ ಪ್ರಾರಂಭದಲ್ಲಿ, ಪ್ರಶ್ನೆಪುಸ್ತಿಕೆಯನ್ನು ನಿಮಗೆ ನೀಡಲಾಗುವುದು. ಮೊದಲ 5 ನಿಮಿಷಗಳಲ್ಲಿ ನೀವು ಪುಸ್ತಿಕೆಯನ್ನು ತೆರೆಯಲು ಮತ್ತು ಕೆಳಗಿನಂತೆ ಕಡ್ಡಾಯವಾಗಿ ಪರೀಕ್ಷಿಸಲು ಕೋರಲಾಗಿದೆ.
   (i) ಪ್ರಶ್ನೆ ಪುಸ್ತಿಕೆಗೆ ಪ್ರವೇಶಾವಕಾಶ ಪಡೆಯಲು, ಈ ಹೊದಿಕೆ ಪುಟದ ಅಂಚಿನ ಮೇಲಿರುವ ಪೇಪರ್ ಸೀಲನ್ನು ಹರಿಯಿರಿ. ಸ್ಟಿಕ್ಕರ್ ಸೀಲ್ ಇಲ್ಲದ ಅಥವಾ ತೆರೆದ ಪುಸ್ತಿಕೆಯನ್ನು ಸ್ವೀಕರಿಸಬೇಡಿ.
   (ii) **ಪುಸ್ತಿಕೆಯಲ್ಲಿನ ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ ಮತ್ತು ಪುಟಗಳ ಸಂಖ್ಯೆಯನ್ನು ಮುಖಪುಟದ ಮೇಲೆ ಮುದ್ರಿಸಿದ ಮಾಹಿತಿಯೊಂದಿಗೆ ತಾಳೆ ನೋಡಿರಿ. ಪುಟಗಳು/ಪ್ರಶ್ನೆಗಳು ಕಾಣೆಯಾದ, ಅಥವಾ ದ್ವಿಪ್ರತಿ ಅಥವಾ ಅನುಕ್ರಮವಾಗಿಲ್ಲದ ಅಥವಾ ಇತರ ಯಾವುದೇ ವ್ಯತ್ಯಾಸದ ದೋಷಪೂರಿತ ಪುಸ್ತಿಕೆಯನ್ನು ಕೂಡಲೆ 5 ನಿಮಿಷದ ಅವಧಿ ಒಳಗೆ, ಸಂವೀಕ್ಷಕರಿಂದ ಸರಿ ಇರುವ ಪುಸ್ತಿಕೆಗೆ ಬದಲಾಯಿಸಿಕೊಳ್ಳಬೇಕು. ಆ ಬಳಿಕ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯನ್ನು ಬದಲಾಯಿಸಲಾಗುವುದಿಲ್ಲ, ಯಾವುದೇ ಹೆಚ್ಚು ಸಮಯವನ್ನೂ ಕೊಡಲಾಗುವುದಿಲ್ಲ.**
4. ಪ್ರತಿಯೊಂದು ಪ್ರಶ್ನೆಗೂ (A), (B), (C) ಮತ್ತು (D) ಎಂದು ಗುರುತಿಸಿದ ನಾಲ್ಕು ಪರ್ಯಾಯ ಉತ್ತರಗಳಿವೆ. ನೀವು ಪ್ರಶ್ನೆಯ ಎದುರು ಸರಿಯಾದ ಉತ್ತರದ ಮೇಲೆ, ಕೆಳಗೆ ಕಾಣಿಸಿದಂತೆ ಅಂಡಾಕೃತಿಯನ್ನು ಕಪ್ಪಾಗಿಸಬೇಕು.

   **ಉದಾಹರಣೆ:** (A) (B) ● (D)

   (C) ಸರಿಯಾದ ಉತ್ತರವಾಗಿದ್ದಾಗ.
5. ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಗಳನ್ನು, **ಪತ್ರಿಕೆ III ಪುಸ್ತಿಕೆಯೊಳಗೆ ಕೊಟ್ಟಿರುವ OMR ಉತ್ತರ ಹಾಳೆಯಲ್ಲಿ ಮಾತ್ರವೇ ಸೂಚಿಸತಕ್ಕದ್ದು.** OMR ಹಾಳೆಯಲ್ಲಿನ ಅಂಡಾಕೃತಿ ಹೊರತುಪಡಿಸಿ ಬೇರೆ ಯಾವುದೇ ಸ್ಥಳದಲ್ಲಿ ಗುರುತಿಸಿದರೆ, ಅದರ ಮೌಲ್ಯಮಾಪನ ಮಾಡಲಾಗುವುದಿಲ್ಲ.
6. OMR ಉತ್ತರ ಹಾಳೆಯಲ್ಲಿ ಕೊಟ್ಟ ಸೂಚನೆಗಳನ್ನು ಜಾಗರೂಕತೆಯಿಂದ ಓದಿರಿ.
7. ಎಲ್ಲಾ ಕರಡು ಕೆಲಸವನ್ನು ಪುಸ್ತಿಕೆಯ ಕೊನೆಯಲ್ಲಿ ಮಾಡತಕ್ಕದ್ದು.
8. ನಿಮ್ಮ ಗುರುತನ್ನು ಬಹಿರಂಗಪಡಿಸಬಹುದಾದ ನಿಮ್ಮ ಹೆಸರು ಅಥವಾ ಯಾವುದೇ ಚಿಹ್ನೆಯನ್ನು, ಸಂಗತವಾದ ಸ್ಥಳ ಹೊರತು ಪಡಿಸಿ, OMR ಉತ್ತರ ಹಾಳೆಯ ಯಾವುದೇ ಭಾಗದಲ್ಲಿ ಬರೆದರೆ, ನೀವು ಅನರ್ಹತೆಗೆ ಬಾಧ್ಯರಾಗಿರುತ್ತೀರಿ.
9. ಪರೀಕ್ಷೆಯು ಮುಗಿದನಂತರ, ಕಡ್ಡಾಯವಾಗಿ OMR ಉತ್ತರ ಹಾಳೆಯನ್ನು ಸಂವೀಕ್ಷಕರಿಗೆ ನೀವು ಹಿಂತಿರುಗಿಸಬೇಕು ಮತ್ತು ಪರೀಕ್ಷಾ ಕೊಠಡಿಯ ಹೊರಗೆ OMR ನ್ನು ನಿಮ್ಮೊಂದಿಗೆ ಕೊಂಡೊಯ್ಯಕೂಡದು.
10. ಪರೀಕ್ಷೆಯ ನಂತರ, ಪರೀಕ್ಷಾ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯನ್ನು ಮತ್ತು ನಕಲು OMR ಉತ್ತರ ಹಾಳೆಯನ್ನು ನಿಮ್ಮೊಂದಿಗೆ ತೆಗೆದುಕೊಂಡು ಹೋಗಬಹುದು.
11. **ನೀಲಿ/ಕಪ್ಪು ಬಾಲ್‌ಪಾಯಿಂಟ್ ಪೆನ್ ಮಾತ್ರವೇ ಉಪಯೋಗಿಸಿರಿ.**
12. **ಕ್ಯಾಲ್ಕುಲೇಟರ್, ವಿದ್ಯುನ್ಮಾನ ಉಪಕರಣ ಅಥವಾ ಲಾಗ್ ಟೇಬಲ್ ಇತ್ಯಾದಿಯ ಉಪಯೋಗವನ್ನು ನಿಷೇಧಿಸಲಾಗಿದೆ.**
13. **ಸರಿ ಅಲ್ಲದ ಉತ್ತರಗಳಿಗೆ ಋಣ ಅಂಕ ಇರುವುದಿಲ್ಲ.**
14. **ಕನ್ನಡ ಮತ್ತು ಇಂಗ್ಲೀಷ್ ಆವೃತ್ತಿಗಳ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಗಳಲ್ಲಿ ಯಾವುದೇ ರೀತಿಯ ವ್ಯತ್ಯಾಸಗಳು ಕಂಡುಬಂದಲ್ಲಿ, ಇಂಗ್ಲೀಷ್ ಆವೃತ್ತಿಗಳಲ್ಲಿರುವುದೇ ಅಂತಿಮವೆಂದು ಪರಿಗಣಿಸಬೇಕು.**

**Instructions for the Candidates**

1. Write your roll number in the space provided on the top of this page.
2. This paper consists of seventy five multiple-choice type of questions.
3. At the commencement of examination, the question booklet will be given to you. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as below :
   (i) To have access to the Question Booklet, tear off the paper seal on the edge of the cover page. Do not accept a booklet without sticker seal or open booklet.
   (ii) **Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to pages/questions missing or duplicate or not in serial order or any other discrepancy should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.**
4. Each item has four alternative responses marked (A), (B), (C) and (D). You have to darken the circle as indicated below on the correct response against each item.

   **Example** : (A) (B) ● (D)

   where (C) is the correct response.
5. Your responses to the question of Paper III are to be indicated in the **OMR Sheet kept inside the Booklet**. If you mark at any place other than in the circles in OMR Sheet, it will not be evaluated.
6. Read the instructions given in OMR carefully.
7. Rough Work is to be done in the end of this booklet.
8. If you write your name or put any mark on any part of the OMR Answer Sheet, except for the space allotted for the relevant entries, which may disclose your identity, you will render yourself liable to disqualification.
9. You have to return the test OMR Answer Sheet to the invigilators at the end of the examination compulsorily and must NOT carry it with you outside the Examination Hall.
10. You can take away question booklet and carbon copy of OMR Answer Sheet after the examination.
11. **Use only Blue/Black Ball point pen.**
12. **Use of any calculator, Electronic gadgets or log table etc., is prohibited.**
13. **There is no negative marks for incorrect answers.**
14. **In case of any discrepancy found in the Kannada translation of a question booklet the question in English version shall be taken as final.**

# SANSKRIT

## Paper – III

**सूचना :** अस्मिन् प्रश्नपत्रे **पञ्चसप्तति (75)** बहुवैकल्पिक प्रश्ना: सन्ति । **एकैकस्य** प्रश्नस्य **अङ्कद्वयं** वर्तते । **सर्वे** प्रश्ना: समाधेया:।

1. ''इष्टप्राप्त्यनिष्टपरिहारयो: अलौकिकमुपायं यो वेदयति'' इदं कस्य लक्षणम् ?

   (A) इतिहासस्य (B) पुराणस्य

   (C) श्रुते: (D) स्मृते

2. इष्टीनां प्रकृति: का ?

   (A) सोमयाग: (B) दर्शपूर्णमास:

   (C) ज्योतिष्टोम: (D) अग्निष्टोम:

3. प्रयाजा: कति भवन्ति ?

   (A) सप्त (B) अष्टौ

   (C) त्रय: (D) पञ्च

4. शुन:शेप: कस्य पुत्र: ?

   (A) शुन: पुच्छस्य (B) शुनोलाङ्गूलस्य

   (C) शुनोगर्तस्य (D) अजीगर्तस्य

5. ''य: पृथिवीं व्यथमानामदृंहद् य: पर्वतान्प्रकुपिताँ अरम्णात्'' अस्मिन् मन्त्रे य: शब्देन कं उच्यते ?

   (A) अग्निम् (B) इन्द्रम्

   (C) हिरण्यगर्भम् (D) प्रजापति

6. ''भूतस्यजात: पतिरेकआसीत्'' क: ?

   (A) विष्णु: (B) हिरण्यगर्भ:

   (C) प्रजापति (D) इन्द्र:

7. ''यस्ते गन्ध: पुरुषेषु स्त्रीषु पुंसुभगोरुचि:'' एष: मन्त्र: कस्मिन् सूक्ते अस्ति ?

   (A) इन्द्रसूक्ते (B) वरुणसूक्ते

   (C) पृथिवीसूक्ते (D) कालसूक्ते

8. तैत्तिरीय आरण्यके कति प्रपाठका: सन्ति ?

   (A) अष्टौ (B) दश

   (C) सप्त (D) नव

9. ''न निर्बद्धा उपसर्गा अर्थान्निराहु:'' इति क: अभिप्रैति ?

   (A) गार्ग्य: (B) औदुम्बरायण:

   (C) वार्ष्यायणि: (D) शाकटायन:

10. समीचीनां तालिकां चिनुत।

a. नामानि आख्यातजानि — 1. औदुम्बरायण:

b. इन्द्रियनित्यं वचनम् — 2. शाकटायनोनैरुक्तेसमयश्च

c. षड्भावविकार भवन्तीति — 3. गार्ग्य:

d. उच्चावचा: पदार्था: भवन्तीति — 4. वार्ष्यायणि:

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 2 | 1 | 4 | 3 |
| (B) | 3 | 2 | 1 | 4 |
| (C) | 1 | 2 | 3 | 4 |
| (D) | 4 | 2 | 1 | 3 |

**11.** सत्वप्रधानानि कानि भवन्ति ?

(A) नामानि (B) आख्यातम्

(C) अव्ययानि (D) निपाता:

**12.** पूर्वापरीभूतं भावं केन आचष्टे ?

(A) नाम्ना (B) आख्यातेन

(C) उपसर्गेण (D) निपातेन

**13.** एषु साधुपाठं चिनुत।

(A) अ॒ग्निनार॒यिं अ॒श्नव॒त् पोषमे॒व दि॒वेऽदिवे

(B) अ॒ग्निना र॒यिमश्नवत् पोषमे॒व दि॒वेऽदिवे

(C) अ॒ग्निना र॒यिम् अ॒श्न॒व॒त् पोषं ए॒व दि॒वेऽदिवे

(D) अ॒ग्निनारयिमश्नवत् पोषमेव दि॒वेऽदिवे

**14.** ''वृक्षस्य नु ते पुरुहूत वया:''इत्यत्र 'नु' शब्दस्य क: अर्थ: ?

(A) संशयार्थ: (B) पूर्वपक्षव्यावृत्यर्थ:

(C) निश्चयार्थ: (D) उपमार्थ:

**15.** मिथ: संयुज्य समीचीनां तालिकां चिनुत।

a. विधात्री — 1. निरपेक्षो रव:

b. अभिधात्री — 2. शब्दश्रवणादेव सम्बन्धप्रतीति:

c. विनियोक्त्री — 3. लिङ्गाद्यात्मिका

d. श्रुति: — 4. व्रीह्यादिश्रुति:

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 1 | 2 | 3 | 4 |
| (B) | 2 | 3 | 4 | 1 |
| (C) | 3 | 2 | 1 | 4 |
| (D) | 3 | 4 | 2 | 1 |

**16.** यागादि: करणत्वेनान्वेति ?

(A) योगसाधनाभ्यास: (B) समाधिभावनम्

(C) साधनम् (D) तपश्चरणम्

**17.** अर्थसंग्रहानुसारं प्रकृते: लक्षणं किम् ?

(A) समग्राङ्गोपदेश:

(B) सत्वरजस्तमसां साम्यावस्था

(C) सर्वाङ्गोपदेश:

(D) समभिव्याहार:

**18.** संदंशलक्षणं किम् ?

(A) सर्वाङ्गानुवादेन अन्तराले विहितत्वम्

(B) एकाङ्गानुवादेन विधीयमानयोरङ्गयोरन्तराले विहितत्वम्

(C) प्रयाजाङ्गयोरन्तराले समाहितत्वम्

(D) प्रयाजाङ्गमध्ये विहितमभिक्रमणम्

**19.** सांख्यानुसारं प्रदीपकल्पा: परस्परविलक्षणा: के ?

(A) परस्परविरुद्धस्वभावा: प्रमाणविशेषा:

(B) प्रकृतिपुरुषसम्बन्धरूपा:

(C) ज्ञानकर्मेन्द्रियाणां विषया:

(D) गुणविशेषा:

**20.** पुरुषबहुत्वं न सिध्यति

(A) त्रिगुणानामन्यथात्वात्

(B) दृष्टत्वाकर्तृत्वाभावात्

(C) अयुगपत्प्रवृत्ते:

(D) जन्ममृत्युकरणानां व्यवस्थात:

**21.** रज्ज्वज्ञानं स्वावृत्तरज्जौ स्वशक्त्या सर्पादिकमुद् भावयति कः ?

(A) आवरणशक्तिः

(B) अज्ञानशक्तिः

(C) विक्षेपशक्तिः

(D) मायाशक्तिः

**22.** मिथः संयुज्य समीचीनां तालिकां चिनुत।

a. प्राणः 1. नामावाग्गमनवान् पाखादिस्थानवर्ती

b. अपानः 2. विश्वग् गमनवानखिलशरीरवर्ती

c. ब्यानः 3. ऊर्ध्वगमनवानुत्क्रमणवायु

d. उदानः 4. प्राग्गमनवान्नासाग्रस्थानवर्ती

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 4 | 1 | 2 | 3 |
| (B) | 4 | 3 | 1 | 2 |
| (C) | 2 | 4 | 3 | 1 |
| (D) | 1 | 3 | 4 | 2 |

**23.** नचिकेतसः पित्रा अनुष्ठितः

(A) अग्निष्टोमयागः

(B) सवनयागः

(C) सोमयागः

(D) विश्वजित्यागः

**24.** असुर्या नाम ते लोका __________ शून्यस्थानं पूरय।

(A) अन्धेन तमसाऽऽवृत्ता ।

(B) अन्धेन मनसाऽऽवृत्ता ।

(C) गन्धेन तमसाऽऽवृत्ता ।

(D) गन्धेन मनसाऽऽवृत्ता ।

**25.** उमा–हैमवती–आख्यानं कस्यामुपनिदि ?

(A) कठोपनिषदि

(B) ईशोपनिषदि

(C) केनोपनिषदि

(D) बृहदारण्यके

**26.** पञ्चकोशविवेकवर्णनमुपलभ्यते ?

(A) छान्दोग्योपनिषदि

(B) मुण्डकोपनिषदि

(C) कठोपनिषदि

(D) तैत्तिरीयोपनिषदि

**27.** अजातशत्रु–गार्ग्यसम्वादः कस्यामुपनिषदि ?

(A) ऐतरेयोपनिषदि

(B) बृहदारण्यके

(C) प्रश्नोपनिषदि

(D) न कुत्राऽपि

**28.** ‘‘स्मृतिरूपपरत्रपूर्वदृष्टावभासः इदं कस्य लक्षणम् ?

(A) अध्यासस्य

(B) भ्रमस्य

(C) ब्रह्मणः

(D) स्मृतिज्ञानस्य

**29.** निरतिशयं सर्वज्ञवीजमिति कस्य शक्तिमत्वं द्योतयति ?

(A) योगिनः

(B) ब्रह्मणः

(C) प्रजापतेः

(D) ईश्वरस्य

**30.** पातञ्जलयोगे ''शब्दज्ञानानुपाती'' 'वस्तुशून्यम्' उभयं कस्य विशेषणम् ?

(A) विपर्ययस्य (B) विकल्पस्य

(C) निद्रायाः (D) प्रत्याहारस्य

**31.** मिथः संयुज्य समीचीनां तालिकां चिनुत।

a. माध्यमिकः 1. बाह्यार्थशून्यत्वम्

b. योगाचारः 2. बाह्यार्थानुमेयत्वम्

c. सौत्रान्तिकः 3. बाह्यार्थप्रत्यक्षत्वम्

d. वैभाषिकः 4. सर्वशून्यत्वम्

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 4 | 1 | 2 | 3 |
| (B) | 4 | 3 | 2 | 1 |
| (C) | 4 | 3 | 1 | 2 |
| (D) | 1 | 2 | 3 | 4 |

**32.** जैनमतानुसारं पञ्चव्रतानां स्वरूपमस्ति

(A) अहिंसासत्यतपःस्वाध्यायेश्वरप्रणिधानानि ।

(B) अहिंसा शौचसन्तोषतपः स्वाध्यायाः ।

(C) अहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहाः ।

(D) अहिंसा सन्तोष ब्रह्मचर्यनियमरूपाः।

**33.** 'नीवह्योर्न' – वार्तिकमिदं किं द्योतयति ? उत्तरं पठित्वा सत्यमसत्यञ्च विचिनुत।

a. व्यन्तावस्थायां कर्मत्वं वारयति

b. व्यन्तावस्थायां करणत्वं कथयति

c. भारं भृत्येन नाययति वाहयति वा साधयति

d. गतिबुद्धिप्रत्यवसानार्थ ..... इति सूत्रस्य अपवादमेव

(A) सर्वमसत्यम्

(B) सर्वं सत्यम्

(C) b, d – उभयमपि सत्यम्

(D) a and c – असत्यम्

**34.** शब्दानुशासनस्य प्रयोजन यथायोग्यं मिथः संयुज्य समीचीनमुत्तरं चिनुत।

a. दुष्टः शब्दः 1. अनग्नाविव शुष्कैधो न तज्ज्वलतिकर्हिचित्

b. यदधीतम् 2. कामं तेषु तु बिप्रोष्य स्त्रीष्विवायमहं वदेत्

c. अविद्वासः 3. यदुदुम्बरवर्णानां घटीनां महत्

d. यस्तु प्रयुङ्क्ते 4. यथेन्द्रशत्रुः स्वरतोऽपराधात्

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 1 | 2 | 3 | 4 |
| (B) | 2 | 4 | 1 | 3 |
| (C) | 3 | 4 | 2 | 1 |
| (D) | 4 | 1 | 2 | 3 |

**35.** 'प्रतीतपदार्थको लोके ध्वनिः शब्दः' वाक्यमिदं कः समर्थयति ?

(A) पतञ्जलिः

(B) आनन्दवर्धनः

(C) विश्वनाथः

(D) पाणिनिः

**36.** 'एध्' धातोः आत्मनेपदे लिट्लकारे उत्तमपुरुष बहुवचने रूपं भवति ?

(A) एधाञ्चकृषे

(B) एधाञ्चकृमहे

(C) एधाञ्चकृद्वे

(D) एधितास्महे

**37.** अर्थप्रवृत्तितत्त्वानां निबन्धनम् किम् ?

(A) वाक्यानि

(B) अर्था:

(C) शब्दा:

(D) प्रत्यया:

**38.** 'करभोरू' शब्दस्य स्त्रीरूपं भवति ?

(A) करभोरू

(B) करभोरा

(C) करभोरी

(D) करोभोरू:

**39.** ''सहाध्यायिनोऽमात्यान कुर्वीत दृष्ट शौचसामर्थ्यत्वात्''
इत्येष: कस्य भिप्राय: ?

(A) विशालाक्षस्य

(B) पराशरस्य

(C) कौणपदन्तस्य

(D) भारद्वाजस्य

**40.** अधस्तनेषु कौटिल्याभिप्राय: क: ?

(A) धर्मार्थाविरोधेन कामं सेवेत

(B) धर्मार्थ विरोधेन कामं सेवेत

(C) धर्मार्थ विरोधे न कामं सेवेत

(D) धमार्थाविरोधे न कामं सेवेत

**41.** ''आचाद्विच्युतो विप्रो न वेदफलमश्नुते आचारेणतु संयुक्त: सम्पूर्णफलभाग्भवेत्''
इदं कस्य वचनम् ?

(A) कौटिल्यस्य

(B) याज्ञवल्क्यस्य

(C) पराशरस्य

(D) मनो:

**42.** ''स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारत: अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्मृति:।।
एषा कस्योक्ति: ?

(A) याज्ञवल्क्यस्य

(B) पराशरस्य

(C) मनो:

(D) बृहस्पत्यस्य

**43.** ''संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली काव्यं स्फुरदलंकारं गुणवद्दोषवर्जितम्।'' कस्मिन् पुराणे इदं काव्य लक्षणमुक्तम् ?

(A) वायुपुराणे

(B) स्कन्दपुराणे

(C) अग्निपुराणे

(D) गरुडपुराणे

**44.** वाल्मीकिरामायणे अहल्योद्धार प्रसंग: कस्मिन् काण्डे विद्यते ?

(A) अयोध्याकाण्डे

(B) किष्किन्दाकाण्डे

(C) अरण्यकाण्डे

(D) बालकाण्डे

45. ''वैयासिकीशतसाहस्त्रीसंहिता'' का ?

(A) स्कन्दपुराणम्

(B) महाभारतम्

(C) भागवतं पुराणम्

(D) मार्कण्डेयपुराणम्

46. तर्कभाषाकृन्मते आत्मा क: ?

(A) प्रमाणम्

(B) प्रमिति:

(C) प्रमेय:

(D) गुण:

47. घटकार्योत्पत्तौ कुलालजनक: किं भवति ?

(A) असमवायि कारणम्

(B) समवायिकारणम्

(C) निमित्तकारणम्

(D) उपादानकारणम्

48. तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताक अभाव: क: ?

(A) अत्यन्ताभाव:

(B) प्रागभाव:

(C) प्रध्वंसाभाव:

(D) अन्योन्याभाव:

49. रक्तसम्बन्धवाचकानां संख्यावाचकानां च पदानां रूपसाम्ये सति किं निश्चीयते ?

(A) भाषाणां विभेद:

(B) भाषाणाम् एककुटुम्बित्वम्

(C) भाषाणां नानाकुटुम्बित्वम्

(D) भाषाणां परिवारसम्बन्ध:

50. 'दश'इति संस्कृत भाषापदस्य लुप्तायाम् 'इण्डो-यूरोपियन्' इति भाषायां कल्पितं पदं किम् ?

(A) डिसेम्

(B) टैहुम्

(C) डेक्मे

(D) डेक्को

51. ''अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताऽङ्गगुणेन विस्तरम्'' -इत्यत्र क: वर्ण्यते ?

(A) रघु:

(B) अर्जुन:

(C) नल:

(D) श्रीकृष्ण:

52. ''बुद्धिशून्यो हि भूभृदत्युच्छ्रितोऽपि परैरध्यारुह्यमाणम् आत्मानं न चेतयते''-कुत्रास्ति एषा सूक्ति: ?

(A) हर्षचरिते

(B) दशकुमारचरिते

(C) कादम्बर्याम्

(D) वासवदत्तायाम्

53. 'इह परत्र च शर्मणे' का आवश्यकी ?

(A) भगवत्प्रसत्ति:

(B) सम्पत्

(C) शुद्धा जनि:

(D) शुद्धवंश्या सन्तति:

**54.** ''काऽप्यभिख्या तयोरासीत् व्रजतो: शुद्धवेषयो:'' इत्यत्र 'अभिख्या'-शब्दार्थ: क: ?

(A) शोभा

(B) ख्यापनम्

(C) प्रसिद्धि:

(D) राग:

**55.** अधस्तनयुग्मानां समीचीनां तालिकां चिनुत।

| | |
|---|---|
| a. ज्ञाने | 1. श्लाघाविपर्याय: |
| b. त्यागे | 2. सप्रसवा इव |
| c. शक्तौ | 3. मौनम् |
| d. गुणानुबन्धित्वात् गुणा: | 4. क्षमा |

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 4 | 3 | 1 | 2 |
| (B) | 1 | 3 | 4 | 2 |
| (C) | 3 | 1 | 4 | 2 |
| (D) | 1 | 3 | 2 | 4 |

**56.** ''प्रावृषेण्यं पयोवाहं विद्युदैरावताविव'' इत्यत्र उपमेयानि कानि ?

(A) स्यन्दनम्, इन्दुमती, अज:

(B) स्यन्दनम्, सुदक्षिणा, दिलीप:

(C) स्यन्दनम्, कौसल्या, दशरथ:

(D) स्यन्दनम्, कुमुद्वती, कुश:

**57.** शशिनो मलत्वेन का आरोपिता ?

(A) राहुमुखच्छाया

(B) जगत:छाया

(C) केतुच्छाया

(D) भूमे:छाया

**58.** 'व्रजन्ति ते मूढधिय: पराभवं भवन्ति मायाविषु ये न मायिन:' इति सूक्ति: कुत्र अस्ति ?

(A) नैषधीयचरिते

(B) किरातार्जुनीये

(C) शिशुपालवधे

(D) रघुवंशे

**59.** अहर्दिवं दिव: अस्वास्थ्यं क: चक्रे ?

(A) बली

(B) जरासन्ध:

(C) हिरण्यकशिपु:

(D) रावण:

**60.** ''लोके हि लोहेभ्य: कठिनतरा: खलु स्नेहमया: बन्धनपाशा:''-कुत्रास्ति एषा सूक्ति: ?

(A) दशकुमारचरिते

(B) कादम्बर्याम्

(C) वासवदत्तायाम्

(D) हर्षचरिते

**61.** ''अहो ! जगति जन्तूनामसमर्थितोपनतान्यापतन्ति वृत्तान्तराणि''- कस्येदं कथनम् ?

(A) श्वेतकेतो:

(B) चन्द्रापीडस्य

(C) तारापीडस्य

(D) कपिञ्जलस्य

**62.** रिक्तस्थानं पूरयत।

''काव्यं यशसेऽर्थकृते

व्यवहारविदे शिवेतरक्षतये।

______________

कान्तासम्मिततयोपदेशयुजे।।

(A) सद्योपरनिर्वृतये (B) सद्यः परनिवृत्तये

(C) सद्यः परनिर्वृतये (D) सद्यः परनिर्वृत्तये

**63.** अधस्तनयुग्मानां समीचीनां तालिकां चिनुत।

a. निगीर्णविषयस्य अन्यतादात्म्यकृत् — 1. सारोपा

b. अनिगीर्णविषयस्यान्य--तादात्म्यकृत् — 2. गौणी

c. सादृश्यातिशयेन भेदप्रतीतिस्थगनम् — 3. साध्यवसाना

d. उपचारसहिता — 4. उपचारः

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 4 | 3 | 1 | 2 |
| (B) | 3 | 1 | 2 | 4 |
| (C) | 3 | 1 | 4 | 2 |
| (D) | 1 | 3 | 4 | 2 |

**64.** मम्मटाचार्यमते स्फुटालङ्कारविरहेऽपि

(A) काव्यत्वहानिः

(B) न काव्यत्वहानिः

(C) काव्यव्यवहारो न

(D) अकाव्यव्यवहारः

**65.** ''संयोगाद्यैरवाच्यार्थधीकृद्

व्यापृतिरञ्जनम्'' इत्यत्र

''अञ्जनम्'' नाम कोऽर्थः ?

(A) व्यञ्जना

(B) अञ्जनद्रव्यम्

(C) अञ्जनादेवी

(D) आञ्जनेयमाता

**66.** अधस्तनयुग्मानां समीचीनां तालिकां चिनुत।

a. प्रकृतं प्रतिषिद्ध्य अन्यत् स्थापनम् — 1. वक्रोक्तिः

b. यदुक्तमन्यथा वाक्यम् अन्यथाऽन्येन योज्यते — 2. निदर्शना

c. अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः — 3. विभावना

d. क्रियायाः प्रतिषेधेऽपि फलव्यक्तिः — 4. अपह्नुतिः

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 1 | 4 | 2 | 3 |
| (B) | 4 | 1 | 2 | 3 |
| (C) | 2 | 3 | 4 | 1 |
| (D) | 4 | 1 | 3 | 2 |

**67.** प्रतीयमानार्थस्य ज्ञानं केषां भवति ?

(A) अलङ्कारतत्त्वज्ञानाम्

(B) पदार्थतत्त्वज्ञानाम्

(C) काव्यार्थतत्त्वज्ञानाम्

(D) शब्दार्थशासनविदाम्

**68.** रिक्तस्थानं पूरयत ।

''जग्राह पाठ्यम् ऋग्वेदात्

सामभ्यो गीतमेव च''।

____________

रसान् आथर्वणादपि।।

(A) यजुस्तस्मादभिनयान्

(B) यजुर्वेदात्त्वभिनयान्

(C) यजुर्वेदस्त्वभिनयान्

(D) यजुर्वेदादभिनयान्

**69.** ''ममापि क्षपयतु पुनर्भवं

नीललोहित: परिगतशक्तिरात्मभ्:''

इत्यत्र शाकुन्तलपद्ये ''नीललोहित:'' क: ?

(A) मन्मथ:

(B) शिव:

(C) ब्रह्मा

(D) विष्णु:

**70.** ''सर्वथा व्यवहर्तव्यं

कुतो ह्यवचनीयता'' एषा सूक्ति: कुत्रास्ति ?

(A) अभिज्ञानशाकुन्तले

(B) उत्तररामचरिते

(C) मुद्राराक्षसे

(D) रत्नावल्याम्

**71.** निर्वहणसन्धौ को रस: उपनिबध्य: ?

(A) अद्भुतरस:

(B) वीररस:

(C) शृङ्गाररस:

(D) करुणरस:

**72.** नाट्यं नाम

(A) लोकालोकदर्शकम्

(B) लोकवृत्तानुकरणम्

(C) लोकप्रवृत्तिनिबन्धनम्

(D) लोकवृत्तकथनम्

**73.** दशरूपकानुसारम् 'अधिकार:' क: ?

(A) फलप्राप्तौ प्रवृत्ति:

(B) फलप्राप्ति:

(C) फलप्रवृत्ति:

(D) फलस्वाम्यम्

अधोलिखितं गद्यांशं पठित्वा, गद्याधारेण पृष्टयो: **74-75** प्रश्नयो: उत्तरे अङ्कयत।

भारतदेशस्य संमाननीय-प्रधानमन्त्रिण: श्रीमत: नरेन्द्र दामोदरदास मोदी महाशयस्य प्रस्तावम् अनुसृत्य जून् मासस्य 21 दिनाङ्कम् अन्ताराष्ट्रीययोगदिनत्वेन विश्वसंस्था उद्घोषयत्। प्रपञ्चस्य 177 देशा: विश्वसंस्थाकृतां प्रस्तावनां सामोदं सहर्षं च अङ्ग्यकुर्वन् । जून्-मासस्य एकविंशतितमे दिनाङ्के भूमण्डलं परित: भगवत: अंशुमालिनो मयूखा: प्रसृमराभूत्वा दिनदैर्घ्यस्य कारणानि भवन्ति, प्राणप्रदस्य वायो: प्रसाराधिक्यं च बोभवीति। 'आरोग्यं भास्करादिच्छेत्' इत्युक्त्यनुसारं प्रभूतै: दिवाकरकिरणै: सह मानवस्वास्थ्य सम्बन्धं स्मारयितुं, योगाभ्यासपरम्परां वैश्विकाभियानरूपेण योजयितुं, भारतीयानां मनीषिणाम् ऋषीणां च हठ-योगाभ्यास-परम्परां ख्यापयितुं च स दिनाङ्क:चित:, स च दैवेन दत्त: अवसर: संस्कृतज्ञानां कृते। अन्ताराष्ट्रीययोगदिनसमाचरणरूपेण वैश्विकप्रयत्नेन प्राचीन भारतीयाया योगाभ्यास विद्याया:, तत्र वैज्ञानिकानुसन्धानप्रवृत्तेश्च विकास: भविष्यति। योगाभ्यासपटूनां युवकयुवतीनां भारते भारताद्बहिश्च उद्योगावस नूनमेव सम्भाव्यन्ते। योगाभ्यासस्य हठाभ्यासस्य वा सिद्धे: लक्षणानि हठयोगप्रदीपिकायां स्वात्मारामयोगिना इत्थमुक्तानि सन्ति। तथा हि -

वपु: कृशत्वं वदने प्रसन्नता
नादस्फुटत्वं नयने सुनिर्मले।
अरोगता बिन्दुजयोऽग्निदीपनं
नाडीविशुद्धि: हठसिद्धिलक्षणम्।। इति।

**74.** जून् मासस्य एकविशंतिदिनाङ्के एव अन्ताराष्ट्रीययोगदिनाचरणनिर्णयस्य कारणं किम् ?

(A) युरोप्-देशीयानां तदा विरामा भवन्ति इति

(B) दिनस्य व्यापृति: सुदीर्घा भवति इति

(C) दिनदैर्घ्यम्

(D) सूर्यकिरणहेतुकं चैतन्याधिक्यं प्राणवायो: प्रसाराधिक्यं च

**75.** हठसिद्धिलक्षणं किं न भवति ?

(A) वदने प्रसन्नता

(B) नयने असुनिर्मले

(C) बिन्दुजय:

(D) अग्निदीपनम्

ಚಿತ್ತು ಬರಹಕ್ಕಾಗಿ ಸ್ಥಳ
Space for Rough Work